# नास्ति त्यागसमम् सुखम्

(त्याग के समान सुख नहीं है)

1. *अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा बभूव। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।*

## हिंदी अनुवाद (Hindi Translation)

एक बार भगवान बोधिसत्व अनेक जन्मों में कमाये हुए (अर्जित) पुण्य फलों से शिवियों के राजा हुए। वह बचपन से ही बड़े-बूढ़ों की सेवा करने वाले विनम्रता संपन्न तथा शास्त्रों में पारंगत थे। जनकल्याण के कर्मों में लीन वह पुत्रों की भाँति प्रजाओं का पालन करते थे। करुणा, उदारता आदि गुणों से युक्त उन्होंने नगर के चारों ओर धन और धान्य से सम्पन्न दानशालाएँ बनवा दीं। वहाँ पर याचकों के समूह अनाज, पानी, वस्त्र, चाँदी और सोना आदि अभीष्ट वस्तुओं को प्राप्त करके सन्तुष्ट हो जाते। राजा की दानशीलता को सुनकर दूसरे देशों से भी लोग उस देश को आते थे।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**समन्ततः**–परितः, चारों ओर (All the sides)। **आर्थिनाम्**–याचकानाम्, भिखारियों का (Of beggars)। **अभीष्टानि**–इच्छितानि, चाही हुई (Desired)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

वृद्धोपसेवी – वृद्ध + उपसेवी (गुणसन्धिः)। सद्गुणोपेतः – सत् + गुण + उपेतः (जशत्व + गुणसन्धिः)।
देशान्तरेभ्योऽपि – देशान्तरेभ्यः + अपि (विसर्गसन्धिः)। बहुजन्मार्जित – बहुजन्म + अर्जित (दीर्घसन्धिः)।

## समासाः (Compounds)

शास्त्रपारङ्गतः – शास्त्रेषु पारङ्गतः (सप्तमी तत्पुरुषः)। विनयशीलः – विनयः एव शीलं यस्य सः (बहुव्रीहिः)।
दानशालाः – दानाय शालाः (चतुर्थी तत्पुरुषः)। सद्गुणोपेतः – सद्गुणैः उपेतः (तृतीया तत्पुरुषः)।
अभीष्टानि वस्तूनि – अभीष्टवस्तूनि (कर्मधारयः) वृद्धोपसेवी – वृद्धाणाम् उपसेवी (षष्ठी तत्पुरुषः)।

## प्रत्ययाः (Suffixes)

भगवन् – भग + मतुप्। प्राप्य – प्र + आप् + ल्यप्।
अर्थिनाम् – अर्थ + इन्। दानशीलताम् – दानशील + तल्।
उपसेवी – उपसेवा + इन्।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(i) कः शिवीनां राजा बभूव? (ii) राजा पुत्रवत् काः पालयति स्म?

**(II) पूर्णवाक्येन उत्तरत–**

(i) राजा नगरस्य समन्ततः किम् अकारयत्? (ii) शास्त्रेषु पारंगतः कः आसीत्?

**(III) भाषिककार्यम्–**

(i) 'श्रुत्वा' इत्यर्थे अत्र किम् पदम् प्रयुक्तम्?
(क) रतः (ख) आकर्ण्य (ग) समन्ततः (घ) कारुण्य

(ii) 'आयान्ति स्म' इति क्रियायाः कर्तृपदं किम्?
(क) राज्ञः (ख) देशम् (ग) तम् (घ) जनाः

(iii) 'असौ' इति सर्वनामपदस्य प्रयोगः अनुच्छेदे कस्मै अभवत्?
(क) प्रजायै (ख) जनेभ्यः (ग) राज्ञे (घ) भिक्षुकाय

(iv) 'अभीष्टानि वस्तूनि' इति अनयोः पदयोः विशेष्यपदम् किम्?
(क) वस्तु (ख) वस्तूनि (ग) अभीष्टानि (घ) अभीष्टम्

(v) 'भगवान्' इति पदे कः प्रत्ययः?
(क) इन् (ख) ठक् (ग) मतुप् (घ) क्तवतु

(vi) 'रतः' इति पदे कः प्रत्ययः?
(क) क्त (ख) क्तवतु (ग) क्त्वा (घ) तुमुन्

**उत्तराणि–** (I) (i) बोधिसत्त्वः (ii) प्रजाः।

(II) (i) राजा नगरस्य समन्ततः धन-धान्य समृद्धाः दानशालाः अकारयत्। (ii) बोधिसत्त्वः / राजा शिविः शास्त्रेषु पारंगतः आसीत्।

(III) (i) (ख) आकर्ण्य (ii) (घ) जनाः (iii) (ग) राज्ञे (iv) (ख) वस्तूनि (v) (ग) मतुप् (vi) (क) क्त।

**प्रश्ननिर्माणम्–** (*i*) भगवान् बोधिसत्त्वः **शिवीनां** राजा बभूव।

(*ii*) सः **धन-धान्यसमृद्धाः** दानशालाः अकारयत्।

(*iii*) **जनाः** नृपस्य दानशीलतां श्रुत्वा तत्र आगच्छन्।

(*iv*) राजा पुत्रवत् **प्रजाः** पालयति स्म।

(*v*) दानशालाभ्यः जनाः **आवश्यकानि** वस्तूनि लभन्ते स्म।

**उत्तराणि–**(*i*) केषाम् (*ii*) कीदृशाः (*iii*) के (*iv*) काः (*v*) कीदृशानि।

2. ***अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते'। एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।***

### हिंदी अनुवाद (Hindi Translation)

उसके बाद एक बार दानशालाओं में घूमते हुए उस राजा ने बहुत सारे धन के लाभ से संतुष्ट माँगने वालों की कम संख्या को देखकर सोचा 'मेरे याचक तो धन प्राप्ति से ही सन्तुष्टि को प्राप्त हो जाते हैं। निश्चित रूप से वे दानवीर सौभाग्यशाली होते हैं जिनसे याचक शरीर के अंगों की भी याचना करते हैं।' इस प्रकार राजा को अपने शरीर के अंगों के प्रति भी अरुचि को देखकर सारा ब्रह्माण्ड व्याकुल हो गया।

### शब्दार्थाः (Word–meanings Sanskrit to Sanskrit, Hindi and English)

**विचरन्**–परिभ्रमन्, घूमते हुए (While walking)। **निरासक्तिम्**–विरक्तिम्, वैराग्य को (Detachment)। **विज्ञाय**–ज्ञात्वा, जानकर (Having known)।

### सन्धि-विच्छेदः (Disjoin Sandhi)

गात्रेष्वपि – गात्रेषु + अपि (यण् सन्धिः)। सञ्जातम् – सम् + जातम् (परसवर्ण सन्धिः)।
व्याकुलम् – वि + आकुलम् (यण् सन्धिः)। अङ्गानि – अम् + गानि (परसवर्ण सन्धिः)।

### समासाः (Compounds)

बहुधनलाभेन – बहुधनानाम् लाभेन (षष्ठी तत्पुरुषः)। दानवीराः – दाने वीराः (सप्तमी तत्पुरुषः)।
शरीरस्य अङ्गानि – शरीराङ्गानि (षष्ठी तत्पुरुषः)। विरलसंख्याम् – विरलाम् संख्याम् (कर्मधारयः)।

### प्रत्ययाः (Suffixes)

अर्थिनाम् – अर्थ + इन्। विचरन् – वि + चर् + शतृ।
विज्ञाय – वि + ज्ञा + ल्यप्। सञ्जातम् – सम् + जन् + क्त।
विलोक्य – वि + लोक् + ल्यप्।

### प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) दानशालासु कः विचरति स्म? (*ii*) के सन्तोषं भजन्ते स्म?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) के सौभाग्यशालिनः? (*ii*) कथं सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्?

**(III) भाषिककार्यम्–**

(*i*) गद्यांशात् एकम् अव्ययपदं चित्वा वदत।
(क) अथ (ख) ते (ग) स (घ) विलोक्य

(*ii*) 'भजन्ते' अस्य क्रियापदस्य कर्तृपदम् किम्?
(क) मम (ख) तु (ग) सन्तोषं (घ) अर्थिनः

(*iii*) 'समस्तम्' इत्यर्थे अत्र किम् पदम् प्रयुक्तम्?
(क) विज्ञाय (ख) सकलं (ग) ब्रह्माण्डं (घ) व्याकुलम्

(*iv*) 'अर्थिनः' इति पदस्य पर्यायपदम् अनुच्छेदात् एव चित्वा लिखत।
(क) याचकाः (ख) राज्ञः (ग) अर्थिनां (घ) संख्याम्

(*v*) 'व्याकुलम्' इति कस्य पदस्य विशेषणम्?
(क) सञ्जातम् (ख) सकलम् (ग) ब्रह्माण्ड इति पदस्य (घ) निरासक्तिम् इति पदस्य

(*vi*) 'अर्थिनः' पदे कः प्रत्ययः?
(क) मतुप (ख) ठक् (ग) इन (घ) त्व

**उत्तराणि–** (I) (*i*) राजा (*ii*) अर्थिनः।

(II) (*i*) ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते। (*ii*) राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।

(III) (*i*) (क) अथ (*ii*) (घ) अर्थिनः (*iii*) (ख) सकलं (*iv*) (क) याचकाः (*v*) (ग) ब्रह्माण्डम् इति पदस्य (*vi*) (ग) इन्।

3. ***राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपं धरयित्वा तत्पुरतः अवदत्–हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारा-मण्डलभूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीनः।***

### हिंदी अनुवाद (Hindi Translation)

राजा के इस प्रकार विचार करने पर उसकी दानशीलता की परीक्षा लेने के लिए देवों का स्वामी इन्द्र एक अंधे याचक का रूप धारण कर उसके सामने बोला–हे राजन्! आपकी दानवीरता को सुनकर आशावान होकर मैं आपके समीप आया हूँ। हे महाराज! मैं आँखों से अंधा सूर्य, चाँद, तारों से सजे हुए इस संसार को कैसे देखूँ?

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**परीक्षितुम्**–परीक्षां कर्तुम्, परीक्षा करने के लिए (for examining)। **शक्रः**–सुरेशः, इन्द्र (Lord Indra)। **तत्पुरतः**–तस्य अग्रे, उसके आगे (Before him)। **चक्षुर्हीन**–नेत्रहीनः, आँखों से हीन (Blind)। **आशान्वितः**–आशायाः युक्तः, आशा से युक्त (Hopefull)।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

| | | | |
|---|---|---|---|
| देवाधिपतिः | – देव | + | अधिपतिः (दीर्घसन्धिः)। |
| आशान्वितः | – आशा | + | अन्वितः (दीर्घसन्धिः)। |
| आगतोऽस्मि | – आगतः | + | अस्मि (विसर्गसन्धिः)। |
| चक्षुर्हीनः | – चक्षुः | + | हीनः (विसर्गसन्धिः)। |
| परीक्षितुम् | – परि | + | ईक्षितुम् (दीर्घसन्धिः)। |

**समासाः (Compounds)**

| | |
|---|---|
| तत्पुरतः | – तस्य पुरतः (षष्ठी तत्पुरुषः)। |
| नेत्रहीनयाचकस्य | – नेत्राभ्याम् हीनः याचकः, तस्य (तृतीया तत्पुरुषः, कर्मधारयः)। |
| आशान्वितः | – आशया अन्वितः (तृतीया तत्पुरुषः)। |
| चक्षुर्हीनः | – चक्षुभ्याम् हीनः (तृतीया तत्पुरुषः)। |
| देवाधिपतिः | – देवानाम् अधिपतिः (षष्ठी तत्पुरुषः)। |
| मण्डलभूषितम् | – मण्डलेन भूषितम् (तृतीया तत्पुरुषः)। |
| दानशीलताम् | – दानस्य शीलताम् (षष्ठी तत्पुरुषः)। |

**प्रत्ययाः (Suffixes)**

| | |
|---|---|
| विचारयति | – वि + चर् + शतृ। |
| परीक्षितुम् | – परि+ ईक्ष् + तुमुन्। |
| दानशीलताम् | – दानशील + तल्। |
| आगतः | – आ + गम् + क्त। |
| आकर्ण्य | – आ + कर्ण् + ल्यप्। |

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) नेत्रहीनयाचकः किम् आकर्ण्य आगतः? (*ii*) अत्र सम्बोधनपदम् किम्?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) कः राज्ञः दानशीलतां परीक्षितुम् आगच्छत्? (*ii*) शक्रः कः आसीत्?

**(III) भाषिककार्यम्–**

(*i*) 'भवतः' इति सर्वनामपदस्य प्रयोगः कस्मै अभवत्?
(क) शक्राय (ख) देवाय (ग) राज्ञे (घ) याचकाय

(*ii*) 'विचारयति' पदे कः प्रत्ययः?
(क) शतृ (ख) शानच् (ग) ल्यप् (घ) क्त

(*iii*) 'तारामण्डलभूषितं जगत्' इति अनयोः पदयोः विशेषणपदं किम्?
(क) जगत् (ख) जगतं (ग) तारामण्डल-भूषितं (घ) भूषितं

(*iv*) 'अग्रे' इत्यर्थे किं पदं प्रयुक्तम्?
(क) पश्चात् (ख) पुरतः (ग) तत्पुरतः (घ) आशान्वितः

(*v*) 'पश्येयम्' इति पदम् कस्मिन् लकारे अस्ति?
(क) लट्लकारे (ख) लोट्लकारे (ग) विधिलिङ्लकारे (घ) लङ्लकारे

**उत्तराणि–** (I) (*i*) दानवीरताम् (*ii*) हे राजन् / देव।
(II) (*i*) शक्रः राज्ञः दानशीलतां परीक्षितुम् आगच्छत्। (*ii*) देवाधिपतिः शक्रः आसीत्।
(III) (*i*) (ग) राज्ञे (*ii*) (क) शतृ (*iii*) (ग) तारामण्डलभूषितम् (*iv*) (ख) पुरतः (*v*) (ग) विधिलिङ्लकारे।

**प्रश्ननिर्माणम्–** (*i*) शक्रः **नेत्रहीनस्य** रूपं धृत्वा आगच्छत्। (*ii*) **शक्रः** नृपस्य परीक्षां कर्तुम् इच्छति स्म। (*iii*) महाराज! अहं **नेत्रहीनः** जगत् कथं पश्येयम्। (*iv*) **जगत्** सूर्य-चन्द्रतारा मण्डलेन विभूषितं वर्तते।

**उत्तराणि–**(*i*) कस्य (*ii*) कः (*iii*) कीदृशः (*iv*) किम्।

**4. *राजा उवाच–भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम्, किं करवाणि? विप्रः उवाच–यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत्, "लोके चक्षुर्दानं दुष्करमेव। नूनम्, ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात्। अथवा भवतु नाम। किं बहु चिन्तनेन।" इति विचार्य राजा अभाषत–भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि इति।***

**हिंदी अनुवाद (Hindi Translation)**

राजा बोला! हे भगवन्! आपकी इच्छा को पूर्ण करके मैं अपने आपको अनुगृहीत करना चाहता हूँ। आदेश दें मैं क्या करूँ? ब्राह्मण बोला–यदि आप मुझ पर प्रसन्न हों तो मैं आपसे एक आँख दान के रूप में चाहता हूँ जिससे मेरी लोकयात्रा बिना किसी रुकावट के हो सके। उसे सुनकर राजा ने सोचा, "संसार में नेत्रदान कठिन कार्य ही है। निश्चित रूप से इस प्रकार के दान का इच्छुक यह याचक किसी के द्वारा प्रेरित होगा। अथवा मुझे इससे क्या? अधिक सोच करने से क्या लाभ?" यह सोचकर राजा बोला–हे मित्र एक आँख से क्या, मैं आपको दोनों आँखें देता हूँ।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**उवाच**–अवदत्, बोला (said)। **त्वत्तः**–तव समीपतः, तुम से (From you)। **विचार्य**–चिन्तयित्वा, सोचकर (After thinking)। **लोकयात्रा**–संसारस्य यात्रा, संसार की यात्रा (Journey of life)। **निर्बाधा**–बाधायाः रहिता, बाधा से रहित (Problem less)। **चक्षुर्द्वयम्**–दोनों नेत्र (Both eyes)।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

चक्षुर्दानम् – चक्षुः + दानम् (विसर्ग सन्धिः)।
चक्षुर्द्वयम् – चक्षुः + द्वयम् (विसर्ग सन्धिः)।
केनापि – केन + अपि (दीर्घ सन्धिः)।
भवन्मनोरथं – भवत् + मनोरथं (व्यञ्जन सन्धिः)।

**समासाः (Compounds)**

लोकयात्रा – लोकस्य यात्रा (षष्ठी तत्पुरुषः)।
निर्बाधा – निर्गता बाधा यस्याः सा (बहुव्रीहिः)।
चक्षुर्दानम् – चक्षुषः दानम् (षष्ठी तत्पुरुषः)।
भवन्मनोरथं – भवतः मनोरथं (व्यञ्जनसन्धिः)।

**प्रत्ययाः (Suffixes)**

भगवन् – भग + मतुप् (सम्बोधने)।
इच्छन् – इष् + शतृ।
त्वत्तः – त्वत् + तसिल्।
विचार्य – वि + चर् + ल्यप्।
श्रुत्वा – श्रु + क्त्वा।
प्रेरितः – प्र + ईर् + क्त।
कर्तुम् – कृ + तुमुन्।
अनुग्रहीतम् – अनु + ग्रह् + क्त।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) का निर्बाधा भवेत्?
(*ii*) 'अहं भवते चक्षुर्द्वयमेव प्रयच्छामि' इति कः अवदत्?

**(II) पूर्णवाक्येन उत्तरत–**

राजा विचार्य किम् अभाषत?

**(III) भाषिककार्यम्–**

(*i*) 'प्रयच्छामि' अत्र क्रियापदस्य कर्तृपदम् किम्?
(क) भवते (ख) अहम् (ग) चक्षुर्द्वयम् (घ) एव

(*ii*) 'आकर्ण्य' इत्यर्थे अत्र किम् पदम् प्रयुक्तम्?
(क) श्रुत्वा (ख) प्रीतः (ग) विचार्य (घ) पूरयित्वा

(*iii*) 'अयम्' इति सर्वनामपदस्य प्रयोगः कस्मै अभवत्?
(क) याचकः (ख) राज्ञे (ग) भिक्षुकः (घ) याचकाय

(*iv*) 'करवाणि' इति पदं कस्मिन् लकारे?
(क) लृट् (ख) लट् (ग) लोट् (घ) लङ्

(*v*) 'ईदृशम्' इति कस्य पदस्य विशेषणम्?
(क) मानस्य (ख) दानस्य (ग) याचकस्य (घ) नृपस्य

(*vi*) 'किं बहु <u>चिन्तनेन</u>' इत्यत्र रेखाङ्कित पदे का विभक्तिः?
(क) तृतीया (ख) द्वितीया (ग) षष्ठी (घ) सप्तमी

**उत्तराणि–** (I) (*i*) लोकयात्रा (*ii*) राजा।
(II) भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि इति।
(III) (*i*) (ख) अहम् (*ii*) (क) श्रुत्वा (*iii*) (घ) याचकाय (*iv*) (ग) लोट् (*v*) (ख) दानस्य (*vi*) (क) तृतीया।

**प्रश्ननिर्माणम्–** (*i*) **विप्रः** उवाच-अहम् एकस्य चक्षुषः दानम् इच्छामि।
(*ii*) अहं **भवते** चक्षुर्द्वयमेव प्रयच्छामि।
(*iii*) येन मम लोकयात्रा **निर्बाधा** भवेत।
(*iv*) अहम् **आत्मानम्** अनुग्रहीतं कर्तुम् इच्छति।

**उत्तराणि–**(*i*) कः (*ii*) कस्मै (*iii*) कीदृशी (*iv*) कम्।

5. ***राज्ञ: नेत्रदानार्थं निश्चयं ज्ञात्वा अमात्या: विषण्णा: भूत्वा अवदन्–महाराज! अलम् एतावता दुस्साहसेन, प्रभूतं धनमेव दीयताम्।***

***अथ स राजा तान् उवाच–***

***दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।***
***कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः॥***

**हिंदी अनुवाद (Hindi Translation)**

राजा के नेत्रदान के निश्चय को जानकर मंत्री ने दु:खी होकर बोला–हे महाराज! इतना दु:साहस मत करें। अधिक धन ही दे दें। उसके बाद वह राजा उन्हें बोला–दान दूँगा, ऐसी प्रतिज्ञा करके जो अपने मन को परिवर्तित कर देता है। कंजूसी से अस्थिर बुद्धि वाले (उस) व्यक्ति से बड़ा पापी कौन हो सकता है।

**अन्वयं लिखत (Prose-order)**

**दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।**
**कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः॥**

दास्यामि इति (*i*) .................... यः मनः अन्यथा (*ii*) .................... कार्पण्य (*iii*) .................... ततः (*iv*) .................... कः स्यात्?

**मञ्जूषा–** कुरुते, पापतरः, अनिश्चितमतेः, प्रतिज्ञाय

**उत्तराणि–**(*i*) प्रतिज्ञाय (*ii*) कुरुते (*iii*) अनिश्चितमतेः (*iv*) पापतरः।

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**विषण्णाः**–दुःखिनः, दुखी (Sad)। **प्रभूतम्**–अत्यधिकम्, बहुत अधिक (Mostly)। **कार्पण्य**–हृदयस्थ-दुर्बलता हृदय की दुर्बलता (Weakness of the heart)। **अमात्याः**–मन्त्रिणः, मन्त्रीगण (Ministers)। **दुस्साहसेन**–साहसेन, साहस से (From daring)।

**संस्कृते भावार्थः (Summary)**

**दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।**
**कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः॥**

अस्य भावोऽस्ति यत्–यः जनः स्वजीवने (*i*) .................... प्रतिज्ञां कृत्वा पश्चात् तस्याः (*ii*) .................... न करोति। तस्मात् कार्पण्य (*iii*) .................... नरात् अधिकः (*iv*) .................... कोऽपि न भवति।

**मञ्जूषा–** पापी, दानस्य, अनिश्चितमतेः, पालनम्

**उत्तराणि–**(*i*) दानस्य (*ii*) पालनम् (*iii*) अनिश्चितमतेः (*iv*) पापी।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

नेत्रदानार्थम् – नेत्रदान + अर्थम् (दीर्घसन्धिः)। दास्यामीति – दास्यामि + इति (दीर्घसन्धिः)।
योऽन्यथा – यो + अन्यथा (पूर्वरूपसन्धिः)। पापतरस्ततः – पापतरः + ततः (विसर्गसन्धिः)।
कार्पण्यानिश्चितमतेः – कार्पण्य + अनिश्चितमतेः (दीर्घसन्धिः)।

**समासाः (Compounds)**

नेत्रदानार्थं – नेत्रस्य दानार्थं (षष्ठी तत्पुरुषः)। प्रभूतं धनम् – प्रभूतधनम् (कर्मधारयः)।
महाराज – महान् राजा, सम्बोधने (कर्मधारयः)।
कार्पण्यनिश्चितमतेः – कार्पण्येन अनिश्चिता मतिः यस्य सः, तस्य (बहुव्रीहिः)।

**प्रत्यया: (Suffixes)**

ज्ञात्वा – ज्ञै + क्त्वा। भूत्वा – भू + क्त्वा। विषण्णाः – वि + सद् + क्त।
प्रतिज्ञाय – प्रति + ज्ञा + ल्यप्। पापतरः – पाप + तरप्।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) के विषण्णाः आसन्?

(*ii*) मन्त्रिणः किम् दातुम् कथयन्ति?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) 'अलम्' योगे का विभक्तिः प्रयुक्ता?

(*ii*) अत्र 'तान्' पदम् केभ्यः प्रयुक्तम्?

**(III) भाषिककार्यम्–**

(*i*) 'प्रभूतम् धनम्' इति अनयोः पदयोः विशेषणपदं किम्?

(क) धनम् (ख) प्रभूत (ग) प्रभूतम् (घ) धनः

(*ii*) 'स्यात्' इति पदे का धातुः?

(क) अस् (ख) अस (ग) स्य (घ) स्याः

(*iii*) 'प्रतिज्ञाय' पदे कः प्रत्ययः?

(क) त्यप् (ख) यत् (ग) क्त्वा (घ) ल्यप्

(*iv*) अस्मिन् अनुच्छेदे सम्बोधनपदं किम्?

(क) अवदन् (ख) अलम् (ग) महाराज! (घ) एतावता

(*v*) 'अवदन्' इति क्रियायाः कर्तृपदं किम्?

(क) भूत्वा (ख) विषण्णाः (ग) अमात्याः (घ) अमात्यः

(*vi*) 'एतावता' इति कस्य पदस्य विशेषणम्?

(क) दुस्साहसेन इति पदस्य (ख) अलम् इति पदस्य

(ग) महाराज! इति पदस्य (घ) राज्ञः इति पदस्य

**उत्तराणि–** (I) (*i*) अमात्याः (*ii*) धनम्।

(II) (*i*) अत्र 'अलम्' योगे तृतीया विभक्ति प्रयुक्ता। (*ii*) अत्र 'तान्' पदं मन्त्रिभ्यः प्रयुक्तम्।

(III) (*i*) प्रभूतम् (*ii*) (क) अस् (*iii*) (घ) ल्यप् (*iv*) (ग) महाराज (*v*) (ग) अमात्याः (*vi*) (क) दुस्साहसेन इति पदस्य।

**प्रश्ननिर्माणम्–** (*i*) **अमात्याः** विषण्णाः भूत्वा अवदन्। (*ii*) **राज्ञा** नेत्रदानार्थं निश्चयं कृतम्

(*iii*) महाराज! प्रभूतं **धनमेव** दीयताम्। (*iv*) ईदृशं **दुस्साहसं** मा कुरु।

(*v*) सः राजा **तान्** उवाच। (*vi*) पापतरः प्रतिज्ञाय पुनः मनः अन्यथा करोति।

**उत्तराणि–**(*i*) के (*ii*) केन (*iii*) किम् (*iv*) किम् (*v*) कान् (*vi*) किम्।

6. ***नाहं स्वर्गं न मोक्षं वा कामये किन्तु आर्त्तानां परित्राणाय एव मे निश्चयः अस्य याञ्चा वृथा मा अस्तु। इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्। सः अपि तत् नेत्रं यथास्थानम् अस्थापयत्। ततो महीपालः द्वितीयं नेत्रमपि शनैः निष्कास्य तस्मै ददौ। अथ विस्मितः शक्रः अचिन्तयत्–***

***अहो धृतिः! अहो सत्त्वम्! अहो सत्त्वहितैषिता!***

## हिंदी अनुवाद (Hindi Translation)

न तो मुझे स्वर्ग प्राप्ति की इच्छा है और न ही मोक्ष की किंतु दुःखियों की रक्षा करना ही मेरा निश्चय है। इसकी याचना व्यर्थ नहीं जानी चाहिए।

ऐसा कहकर उस राजा ने चिकित्सक के द्वारा बताए गए तरीके से नीलकमल की भाँति एक आँख क्षतिहीन रूप से निकाल बड़े प्यार से उस याचक को दे दी। उसने भी उस नेत्र को यथास्थान रख दिया। उसके बाद राजा ने दूसरी आँख भी निकालकर धीरे से उसे दे दी। उसके बाद आश्चर्य भरे इंद्र ने सोचा–

अहो, कैसा धैर्य है? कैसा साहस है? कैसी यह प्राणियों के हित करने की इच्छा है?

**शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)**

**परित्राणाय**–रक्षणाय, रक्षा के लिए (To save)। **याञ्चा**–प्रार्थना, प्रार्थना/इच्छा (Request)। **सत्त्वम्**–जीवन, जीव (Person)। **सत्त्वहितैषिता**–प्राणिनां कल्याणस्य इच्छा, प्राणियों के कल्याण की इच्छा (Wish to have welfare of creatures)।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

| | |
|---|---|
| नीलोत्पलम् – नील + उत्पलम् (गुण सन्धिः)। | एकं चक्षुः – एकम् + चक्षुः (अनुस्वार सन्धिः) |
| नाहम् – न + अहम् (दीर्घ सन्धिः)। | हितैषिता – हित + ऐषिता (वृद्धि सन्धिः)। |
| इत्युक्त्वा – इति + उक्त्वा (यण सन्धिः)। | वैद्योक्तविधिना – वैद्य + उक्तविधिना (गुण सन्धिः)। |

**समासाः (Compounds)**

| | |
|---|---|
| नीलोत्पलम् – नीलम् उत्पलम् इव (कर्मधारयः) | यथास्थानम् – स्थानम् अनतिक्रम्य (अव्ययीभावः)। |
| महीपालः – महीम् पालयति यः सः (बहुव्रीहिः)। | वैद्योक्तविधिना – वैद्यैः उक्ता (तृतीया तत्पुरुषः), तया विधिना (तृतीया तत्पुरुषः)। |
| अक्षतम् – न क्षतम् (नञ् तत्पुरुषः)। | सत्त्वहितैषिता – सत्त्वानाम् हितैषिता (षष्ठी तत्पुरुषः)। |

**प्रत्ययाः (Suffixes)**

उक्त्वा – वच् + क्त्वा। धृतिः – धृ + क्तिन्। समर्पितवान् – सम् + अर्प् + क्तवतु।
ऐषिता – ऐषित + टाप्। विस्मितः – वि + स्मि + क्त।

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) राजा किम् न इच्छति? (*ii*) 'इन्द्रः' अर्थे अत्र किम् पदं प्रयुक्तम्?

**(II) पूर्णवाक्येन उत्तरत–**

विस्मितः कः अचिन्तयत्?

**(III) भाषिककार्यम्–**

(*i*) 'विस्मितः शक्रः' इत्यनयोः पदयोः विशेष्य पदम् किम्?
(क) शक्रः (ख) विस्मित (ग) शक्र (घ) विस्मितः

(*ii*) 'स्थानम् अनतिक्रम्य' इति स्थाने किं पदं प्रयुक्तम्?
(क) उपस्थानम् (ख) निस्थानम् (ग) यथास्थानम् (घ) अनुस्थानम्

(*iii*) 'राजा' पदस्य पर्यायपदम् अनुच्छेदात् एव चित्वा लिखत।
(क) याचकः (ख) प्रजा (ग) जनः (घ) महीपालः

(*iv*) 'समर्पितवान्' इति क्रियायाः कर्तृपदम् किम्?
(क) स (ख) राजा (ग) प्रीत्या (घ) चक्षुः

(*v*) 'प्रीत्या' इति पदे का विभक्तिः?
(क) द्वितीया (ख) प्रथमा (ग) तृतीया (घ) चतुर्थी

(*vi*) 'मे' इति सर्वनामपदस्य प्रयोगः कस्मै अभवत्?
(क) याचकाय (ख) जनाय (ग) राज्ञे (घ) नेत्रहीनाय

(*vii*) 'याचना' इति अर्थे किं पदं प्रयुक्तम्?
(क) याञ्चा (ख) याचनाम् (ग) भिक्षाम् (घ) धनम्

**उत्तराणि–** (I) (*i*) स्वर्गम् (मोक्षम्) (*ii*) शक्रः।
(II) शक्रः विस्मितः अचिन्तयत्।
(III) (*i*) (क) शक्रः (*iv*) (ग) यथास्थानम् (*iii*) (घ) महीपालः (*iv*) (ख) राजा (*v*) (ग) तृतीया। (*vi*) (ग) राज्ञे (*vii*) (क) याञ्चा।

**प्रश्ननिर्माणम्–** (*i*) अस्य याञ्चा **वृथा** मा अस्तु। (*ii*) अथ विस्मितः **शक्रः** अचिन्तयत्।
(*iii*) अहं **स्वर्गं** मोक्षं वा न कामये। (*iv*) शक्रः नेत्रं **यथास्थानम्** अस्थापयत्।

उत्तराणि–(*i*) कीदृशी (*ii*) कः (*iii*) कम् (*iv*) कुत्र।

***7. नायम् चिरं परिक्लेशम् अनुभवितुम् अर्हति। अतः प्रयतिष्ये चक्षुषोऽस्य पुनः प्रत्यारोपणाय इति। कतिपयैः दिनैः व्रणविरोपणे जाते एकदा राजा सरोवरस्य समीपे विहरति स्म। तदा तस्य पुरतः पुनः देवराजः शक्रः उपस्थितः भूत्वा तस्य त्यागवृत्तिं प्रशंसन् अवदत्–***

***शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।***
***वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्॥***

**हिंदी अनुवाद (Hindi Translation)**

यह लम्बे समय तक कष्ट सहन करने योग्य नहीं है। इसलिए मैं इसकी आँखों को फिर से लगाने का प्रयत्न करूँगा। कुछ दिनों के बाद घाव भर जाने के बाद एक बार तालाब के समीप खड़े हुए राजा के सामने फिर से देवराज इंद्र उपस्थित होकर उसकी त्यागवृत्ति की प्रशंसा करता हुआ बोला–मैं देवराज इंद्र आपके पास आया हुआ हूँ। हे राजर्षि! वरदान माँगो। जो चाहते हो वह बोलो।

**अन्वयं लिखत (Prose-order)**

**शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।**
**वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्॥**

राजर्षे! अहं (*i*) .................... शक्रः त्वत् (*ii*) .................... उपागतः अस्मि। वरं (*iii*) .................... यत् इच्छसि (*iv*) .................... उच्यताम्।

**मञ्जूषा–** तत्, समीपम्, देवेन्द्रः, वृणीष्व

**उत्तराणि–**(*i*) देवेन्द्रः (*ii*) समीपम् (*iii*) वृणीष्व (*iv*) तत्।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**चिरम्–**दीर्घकालम् यावत्, देर तक (For a long time)। **प्रयतिष्ये–**प्रयत्नं करिष्यामि, प्रयत्न करूँगा (Shall try)। **प्रत्यारोपणाय–**पुनः आरोपणाय, पुनः लगाने के लिए (For refixing)। **व्रणः–**घातः, घाव (Wound)।

## संस्कृते भावार्थः (Summary)

**शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।**
**वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्॥**

अस्य भावोऽस्ति–अस्मिन् श्लोके शक्रः (*i*) .................... कथयति यत् अहम् देवानाम् इन्द्रः (नृपः) (*ii*) .................... तव समीपे वरं दातुम् (*iii*) .................... अस्मि। अतः हे राजर्षे! वरं वृणीष्व, यदपि त्वम् इच्छसि तत् (*iv*) .................... कथय।

**मञ्जूषा–** शक्रः, नृपम्, माम्, उपागतः

**उत्तराणि–**(*i*) नृपम् (*ii*) शक्रः (*iii*) उपागतः (*iv*) माम्

## सन्धि-विच्छेदः (Disjoin Sandhi)

चक्षुषोऽस्य – चक्षुषो + अस्य (पूर्वरूप सन्धिः)।
देवेन्द्रस्त्वत् – देवेन्द्रः + त्वत् (विसर्ग सन्धिः)।
नायम् – न + अयम् (दीर्घ सन्धिः)।
यदिच्छसि – यत् + इच्छसि (व्यंजन सन्धिः)।
शक्रोऽहमस्मि – शक्रो + अहम् + अस्मि (पूर्वरूप सन्धिः)।
तदुच्यताम् – तत् + उच्यताम् (व्यंजन सन्धिः)।
देवेन्द्रः – देव + इन्द्रः (गुण सन्धिः)।
प्रत्यारोपणाय – प्रति + आरोपणाय (यण् सन्धिः)।

## समासाः (Compounds)

व्रणविरोपणे – व्रणस्य विरोपणे (षष्ठी तत्पुरुषः)।
तस्य पुरतः – तत्पुरतः (षष्ठी तत्पुरुषः)।
त्यागवृत्तिम् – त्यागस्य वृत्तिम् (षष्ठी तत्पुरुषः)।
सरोवरस्य समीपे – उपसरोवरम् (अव्ययीभावः)।
देवराजः – देवानाम् राजा (षष्ठी तत्पुरुषः)।
देवेन्द्रः – देवानाम् इन्द्रः (षष्ठी तत्पुरुषः)।

## प्रत्ययाः (Suffixes)

अनुभवितुम् – अनु + भू + तुमुन्।
भूत्वा – भू + क्त्वा
जाते – जन् + क्त।
उपस्थितः – उप + स्था + क्त।
प्रशंसन् – प्र + शंस् + शतृ।
वृत्तिम् – वृत् + क्तिन्।
उपागतः – उप + आ + गम् + क्त।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) कः परिक्लेशम् अनुभवितुम् न अर्हति? (*ii*) शक्रः कः आसीत्?

**(II) पूर्णवाक्येन उत्तरत–**

शक्रः राज्ञः त्यागवृत्तिम् प्रशंसन् किम् अवदत्?

**(III) भाषिककार्यम्–**

(*i*) अत्र सम्बोधनपदम् किम्?
(क) देवेन्द्रः (ख) राजर्षे (ग) राजा (घ) शक्रः

(*ii*) 'अभ्रमत्' इति अर्थे किं क्रियापदं प्रयुक्तम्?
(क) पुरतः (ख) अवदत् (ग) अर्हति (घ) विहरति स्म।

(*iii*) 'अयम्' इति सर्वनामपदस्य प्रयोगः कस्मै अभवत्?
(क) इन्द्रस्य (ख) देवाय (ग) राज्ञे (घ) भिक्षुकाय

(*iv*) 'कतिपयैः दिनैः' इति अनयोः पदयोः विशेषणपदं किम्?
(क) कतिपयैः (ख) कतिपयः (ग) दिनम् (घ) दिनैः

(*v*) 'प्रयतिष्ये' इति पदे का मूलधातुः?
(क) गत् (ख) प्रमत् (ग) यत् (घ) प्र

**उत्तराणि–** (I) (*i*) राजा (*ii*) देवेन्द्रः।
(II) शक्रः राज्ञः त्यागवृत्तिं प्रशंसन् अवदत्–शक्रोऽहमस्मि देवेन्द्रः त्वत्समीपमुपागतः। वरं वृणीश्व राजर्षे! यदिच्छसि तदुच्यताम्।
(III) (*i*) (ख) राजर्षे! (*ii*) (घ) विहरति स्म (*iii*) (ग) राज्ञे (*iv*) (क) कतिपयैः (*v*) (ग) यत्।

**प्रश्ननिर्माणम्–** (*i*) अयम् चिरं **क्लेशम्** अनुभवितुं न अर्हति। (*ii*) **राजा** सरोवरस्य समीपे विहरति स्म।
(*iii*) शक्रः **नृपस्य** त्यागवृत्तिं प्रशंसन् अवदत्। (*iv*) त्वं यद इच्छसि **तद्** उच्यताम्।
(*v*) अहं देवेन्द्रः **शक्रः** अस्मि।

**उत्तराणि–**(*i*) किम् (*ii*) कः (*iii*) कस्य (*iv*) किम् (*v*) कः।

8. *एवम् उक्तेन राज्ञा नेत्रार्थं प्रार्थिते सति शक्रस्य प्रभावेण आत्मनः सत्यपुण्यबलेन च तस्य प्रथमम् एकं चक्षुः प्रतिष्ठितम् अभवत् ततः द्वितीयमपि। भूयः प्रीतः शक्रः वरम् अददात्–शतयोजनपर्यन्तं शैलानां पारं च द्रष्टुं समर्थः भव। इति उक्त्वा शक्रः तत्रैव अन्तर्हितः अभवत्।*
*अतः सत्यमेव उक्तम्–*

*धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन।*
*निधानतां याति हि दीयमानम्, अदीयमानं निधनैकनिष्ठम्॥*

## हिंदी अनुवाद (Hindi Translation)

इंद्र के द्वारा ऐसा कहे जाने पर; राजा के द्वारा नेत्रों के लिए प्रार्थना किए जाने पर; इंद्र के प्रभाव से तथा अपने सत्य व पुण्य के बल से पहले उसकी एक आँख स्थापित हो गई, फिर दूसरी भी। फिर प्रसन्न हुए इंद्र ने वर दिया–चारों ओर सौ योजन तक पर्वतों के पार भी देखने के लिए समर्थ हो जाओ। यह कहकर इंद्र वहीं अन्तर्धान हो गया।
इसलिए सच ही कहा गया है–सारहीन और तुच्छ धन का यही सार है कि यह लोक कल्याण के लिए दिया जाए। इसके लिए दिया गया धन सम्पन्नता को प्राप्त हो जाता है जबकि न दिया गया धन एक दिन विनाश को प्राप्त हो जाता है।

## अन्वयं लिखत (Prose-order)

**धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन।**
**निधानतां याति हि दीयमानम्, अदीयमानं निधनैकनिष्ठम्॥**

निःसारलघोः (*i*) ...................... सः सारः यत् (*ii*) ...................... उन्मुखेन दीयते। (*iii*) ...................... (धनं) निधानतां हि याति। अदीयमानं (धनं) निधन-(*iv*) ...................... (भवति)।

**मञ्जूषा–** | लोकहित, एकनिष्ठम्, धनस्य, दीयमानं |

**उत्तराणि–**(*i*) धनस्य (*ii*) लोकहित (*iii*) दीयमानं (*iv*) एकनिष्ठम्

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**अन्तर्हितः**–अदृश्यः, अदृश्य (Disappear)। **निधानताम्**–सम्पन्नताम्, समृद्धिं (Prosperity)। **निधनैकनिष्ठम्**–विनाशः, विनाश ही जिसकी नियति है (Destined to be ruined)। **प्रतिष्ठितम्**–स्थापितं, स्थापित (Seted)। **सारः**–लाभः, लाभ (Profit)।

## संस्कृते भावार्थः (Summary)

**धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन।**
**निधानतां याति हि दीयमानम्, अदीयमानं निधनैकनिष्ठम्॥**

अस्य भावोऽस्ति यत्–धनस्य (*i*) ...................... अस्ति। तस्य अयम् एव (*ii*) ...................... यत् धनम् संसारस्य हिताय दीयते तत् (*iii*) ...................... सुरक्षितम् भवति, यत् धनम् न दीयते तस्य तु एक पदे एव (*iv*) ...................... सञ्जायते।

**मञ्जूषा–** | लाभः, निधिरूपे, सारहीनम्, नाशः |

**उत्तराणि–**(*i*) सारहीनम् (*ii*) लाभः (*iii*) निधिरूपे (*iv*) नाशः

## सन्धि-विच्छेदः (Disjoin Sandhi)

हितोन्मुखेन – हित + उन्मुखेन (गुण सन्धिः)। अन्तर्हितः – अन्तः + हितः (विसर्ग सन्धिः)।
निधनैकनिष्ठम् – निधन + एकनिष्ठम् (वृद्धि सन्धिः)। तत्रैव – तत्र + एव (वृद्धि सन्धिः)।

## समासाः (Compounds)

नेत्रार्थम् – नेत्रस्य अर्थम् (षष्ठी तत्पुरुषः)
सत्यपुण्यबलेन – सत्यस्य च पुण्यस्य च (द्वन्द्वः) तयोः बलेन (षष्ठी तत्पुरुषः)।
प्रीतः शक्रः – प्रीतशक्रः (कर्मधारयः)
लोकहितोन्मुखेन– लोकहितस्य उन्मुखेन (षष्ठी तत्पुरुषः)।
अदीयमानम् – न दीयमानम् (नञ् तत्पुरुषः)।

**प्रत्ययाः (Suffixes)**

| | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| प्रार्थिते | – | प्र + अर्थ् + क्त। | उक्त्वा | – | वच् + क्त्वा, | दीयमानम् | – | दा + शानच् |
| द्रष्टुम् | – | दृश् + तुमुन्। | उक्तम् | – | वच् + क्त। | निधानताम् | – | निधान + तल्। |
| प्रतिष्ठितम् | – | प्रति + स्था + क्त। | | | | | | |

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) दीयमानं धनं किं प्राप्नोति? (*ii*) कः अन्तर्हितः अभवत्?

**(II) पूर्णवाक्येन उत्तरत–**

शक्रः किं वरम् अददात्?

**(III) भाषिककार्यम्–**

(*i*) 'प्रीतः शक्रः' अनयोः पदयोः विशेषणपदम् किम्?
(क) प्रीतः (ख) शक्रः (ग) प्रीत (घ) शक्र

(*ii*) 'नेत्रम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्?
(क) भूयः (ख) चक्षुः (ग) चक्षुषः (घ) चक्षुष्

(*iii*) 'दीयमानम्' इति पदे कः प्रत्ययः?
(क) शतृ (ख) क्त्वा (ग) शानच् (घ) क्तवतु

(*iv*) 'दीयमानम्' इति पदस्य विपर्ययपदं किम्?
(क) निधानताम् (ख) अदीयमानः (ग) अदीयमानम् (घ) निधानम्

(*v*) 'गच्छति' इति अर्थे किं क्रियापदं प्रयुक्तम्?
(क) याति (ख) दीयते (ग) अददात् (घ) यातु

(*vi*) 'प्रतिष्ठितम्' इति कस्य पदस्य विशेषणम्?
(क) नृपस्य (ख) अमात्यस्य (ग) चक्षुषः (घ) दानस्य

**उत्तराणि–** (I) (*i*) निधानताम् (*ii*) शक्रः (इन्द्रः)।
(II) शक्रः वरम् अददात्–शतयोजनपर्यन्तं शैलानां पारं च द्रष्टुं समर्थः भव इति।
(III) (*i*) (क) प्रीतः (*ii*) (ख) चक्षुः (*iii*) (ग) शानच् (*iv*) (ग) अदीयमानम् (*v*) (क) याति (*vi*) (ग) चक्षुषः।

**प्रश्ननिर्माणम्–** (*i*) **भूयः** प्रीतः शक्र वरम् अददात्। (*ii*) शक्रः तत्रैव **अन्तर्हितः** अभवत्।
(*iii*) **दीयमानं** धनं निधानतां याति। (*iv*) **आत्मनः** सत्यपुण्यवलेन नृपस्य एकं नेत्रं प्रतिष्ठितम् अभवत्।
(*v*) धनं **निःसारं** लघु च भवति।

**उत्तराणि–**(*i*) कति (*ii*) कीदृशः (*iii*) कीदृशम् (*iv*) कस्य (*v*) कीदृशम्।

## पाठ्यपुस्तकस्य अभ्यासः
## (अनुप्रयोगः)

**1. अधोलिखितसम्वादः उचितवाक्यैः पूर्यताम्। (मौखिक-अभ्यासार्थम्)**

(आचार्या प्रविशति, बालाः उत्तिष्ठन्ति)

**छात्राः** आर्ये! वन्दामहे!

**आचार्या** बालाः! चिरं जीवत! उपविशत।

**आचार्या** कपिल! भगवान् बोधिसत्त्वः केषां राजा बभूव?

**कपिलः** मान्ये! ..........................................................................।

**आचार्या** नमन! राजा काः पुत्रवत् पालयति स्म?

**नमनः** आर्ये! ..........................................................................।

**आचार्या** उमे! कस्य समन्तात् राजा दानशालाः अकारयत्?

**उमा** ..........................................................................।

**आचार्या** दिव्ये! केषाम् समूहः सन्तुष्टः अभवत्?
**दिव्या** ..........................................................................................।

**आचार्या** नीरजे! शक्रः कस्य रूपं धृत्वा राज्ञः दानशीलतां परीक्षितुं समागतः?
**नीरजा** ..........................................................................................।

**आचार्या** लोकेश! राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा के विषण्णाः आसन्?
**लोकेशः** ..........................................................................................।

**आचार्या** नेत्रोत्पाटनविधिः केन उक्तः?
**छात्रः** ..........................................................................................।

**आचार्या** अक्षय! निधनैकनिष्ठं किम्?
**अक्षयः** ..........................................................................................।

**आचार्या** कोविद! कस्य प्रभावेण एकं चक्षुः प्रतिष्ठितम् अभवत्?
**कोविदः** ..........................................................................................।

**उत्तराणि–**

**कपिलः** मान्ये! भगवान् बोधिसत्वः शिवीनाम् राजा बभूव।
**नमनः** आर्ये! राजा प्रजाः पुत्रवत् पालयति स्म।
**उमा** नगरस्य समन्तात् राजा दानशालाः अकारयत्
**दिव्या** आर्थिनाम् समूहः सन्तुष्टः अभवत्।
**नीरजा** शक्रः नेत्रहीनयाचकस्य रूपं धृत्वा राज्ञः दानशीलतां परीक्षितुं समागतः।
**लोकेशः** राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा अमात्याः विषण्णाः आसन्।
**छात्रः** नेत्रोत्पाटनविधिः वैद्येन उक्तः।
**अक्षयः** अदीयमानम् निधनैकनिष्ठम् भवति।
**कोविदः** शक्रस्य प्रभावेण एकं चक्षुः प्रतिष्ठितम् अभवत्।

**2. एकवाक्येन उत्तरत–**

(क) बोधिसत्त्वः शैशवात् एव कीदृशः आसीत्?
(ख) शिवेः राज्ये याचकाः किं लब्ध्वा सन्तुष्टाः अभवन्?
(ग) नेत्रहीनयाचकस्य रूपं धृत्वा शक्रः बोधिसत्त्वं किम् अवदत्?
(घ) सकलं ब्रह्माण्डं किं ज्ञात्वा व्याकुलं जातम्?
(ङ) राजा प्रीत्या याचकाय किं समर्पितवान्?

**उत्तराणि–**

(क) बोधिसत्त्वः शैशवात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत्।
(ख) शिवेः राज्ये याचकाः अन्न-पान-वसन-रजत-सुवर्णादिकानि अभिष्टानि वस्तूनि प्राप्य सन्तुष्टाः अभवन्।
(ग) नेत्रहीनयाचकस्य रूपं धृत्वा शक्रः बोधिसत्त्वम् अवदत्, "हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि।"
(घ) राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं ज्ञात्वा सकलं ब्रह्माण्डं व्याकुलं जातम्।
(ङ) राजा प्रीत्या याचकाय चक्षुद्वयम् समर्पितवान्।

**3. अधोलिखित-कथनेषु स्थूलपदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं क्रियताम्–**

**यथा–** राजा **नगरस्य** समन्ततः दानशालाः अकारयत्।
राजा **कस्य** समन्ततः दानशालाः अकारयत्?

(क) अभीष्टवस्तूनि प्राप्य **याचकाः** तुष्टाः आसन्।
(ख) **दानशालासु** विचरन् राजा अचिन्तयत्।
(ग) राजा पुत्रवत् **प्रजाः** पालयति स्म।
(घ) स राजा **तान्** उवाच।
(ङ) राजा **याचकेभ्यः** दानम् ददाति स्म।

**उत्तराणि**–(क) के? (ख) कुत्र? (ग) काः? (घ) कान्? (ङ) केभ्यः?

**4. अधः दत्तानि वाक्यानि केन कम् प्रति उक्तानि–**

| | केन उक्तम् | कम् प्रति उक्तम् |
|---|---|---|
| **यथा–** हे राजन्! भवतः दानवीरताम् आकर्ण्य भवत्समीपम् आगतोऽस्मि। | शक्रेण (नेत्रहीनयाचकरूपधारितेन) | राजानं प्रति |
| (क) आदिश्यताम् किं करवाणि? | .................... | .................... |
| (ख) भो! किमेकेन चक्षुषा? | .................... | .................... |
| (ग) अलम् एतावता दुस्साहसेन। | .................... | .................... |
| (घ) नाहं स्वर्गं मोक्षं वा कामये। | .................... | .................... |
| (ङ) वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्। | .................... | .................... |

| उत्तराणि– केन उक्तम् | कम् प्रति उक्तम् |
|---|---|
| (क) राज्ञा | याचकं प्रति |
| (ख) राज्ञा | याचकं प्रति |
| (ग) अमात्यैः | राजानं प्रति |
| (घ) राज्ञा | अमात्यान् प्रति |
| (ङ) शक्रेण | राजानं प्रति |

**5. अधोलिखितानां वाक्यानां सम्मुखे दत्तेषु भावेषु उचित-भावस्य सम्मेलनं क्रियताम्–**

| वाक्यानि | भावः |
|---|---|
| (क) असौ पुत्रवत् प्रजाः पालयति स्म। | दानवीरता |
| (ख) सः नगरस्य समन्ततः दानशालाः अकारयत्। | दुःखम् |
| (ग) ममार्थिनस्तु धनलाभमात्रेण सन्तोषं लभन्ते। | स्नेहः |
| (घ) राज्ञः नेत्रदाननिश्चयं ज्ञात्वा अमात्याः विषण्णाः जाताः। | उदारता |
| (ङ) अहं भवते चक्षुर्द्वयमेव प्रयच्छामि। | निराशा |

**उत्तराणि–** (क) स्नेहः (ख) उदारता (ग) निराशा (घ) दुःखम् (ङ) दानवीरता।

**6. अधोलिखितानां सूक्तीनाम् अधः सम्बद्धाः पाठान्तर्गतपंक्तयः लिख्यन्ताम्–**

(क) न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम्।
(ख) हुतं च दत्तं च सदैव तिष्ठति।
(ग) क्षयम् आयाति सञ्चयात्।

**उत्तराणि–** (क) नाहं स्वर्गं मोक्षं वा कामये।
(ख) निधानतां याति हि दीयमानम्।
(ग) अदीयमानं निधनैकनिष्ठम्।

**7. प्रसङ्गमाश्रित्य शुद्धमुत्तरं (✓) इति चिह्नेन अङ्कितं कुरुत–**

(क) कार्पण्यानिश्चितमतिः
(*i*) कृपणतावशात् अनिश्चितबुद्धिः
(*ii*) दरिद्रतावशात् दुर्बलबुद्धिः
(*iii*) उदारताकारणात् अस्थिरप्रज्ञः।

(ख) निःसारलघुधनम्
(*i*) सारहीनम् धनम्
(*ii*) चञ्चलम् धनम्
(*iii*) तुच्छधनम्।

**उत्तराणि–** (क) (*i*) कृपणतावशात् अनिश्चितबुद्धिः
(ख) (*iii*) तुच्छधनम्।

**8. अधः केचन विग्रहाः दत्ताः। कोष्ठकात् चित्वा क्रमानुसारं समस्तपदानि लिखत–**

| समास-विग्रहाः | समस्तपदानि |
|---|---|
| (क) निर्गता बाधा यस्याः सा | ................................ |
| (ख) धान्येन समृद्धाः | ................................ |
| (ग) विनयः शीलं यस्य सः | ................................ |
| (घ) वृद्धान् उपसेवितुम् शीलं यस्य सः | ................................ |

| |
|---|
| वृद्धोपसेवी |
| विनयशीलः |
| धान्यसमृद्धाः |
| निर्बाधा |

**उत्तराणि–** (क) निर्बाधा (ख) धान्यसमृद्धाः (ग) विनयशीलः (घ) वृद्धोपसेवी।

9. निर्देशानुसारं कुरुत–

| सन्धिपदम् | सन्धिविच्छेदः | पूर्वपदस्य अन्तिमः वर्णः | अन्तिमपदस्य पूर्वः वर्णः | नाम |
|---|---|---|---|---|
| देवाधिपतिः<br>परीक्षितुम्<br>इत्युक्त्वा<br>गात्रेष्वपि<br>निधनैकनिष्ठम् | | | | |

उत्तराणि–

| सन्धिपदम् | सन्धिविच्छेदः | पूर्वपदस्य अन्तिमः वर्णः | अन्तिमपदस्य पूर्वः वर्णः | नाम |
|---|---|---|---|---|
| देवाधिपतिः | देव + अधिपतिः | अ | अ | दीर्घ |
| परीक्षितुम् | परि + ईक्षितुम् | इ | ई | दीर्घ |
| इत्युक्त्वा | इति + उक्त्वा | इ | उ | यण् |
| गात्रेष्वपि | गात्रेषु + अपि | उ | अ | यण् |
| निधनैकनिष्ठम् | निधन + एकनिष्ठम् | अ | ए | वृद्धि |

10. **अधोलिखितेषु वाक्येषु दत्तेभ्यः अव्ययेभ्यः उचितम् अव्ययपदं प्रयुज्यताम्–**

(यदि, तदा, अथ कदाचित्, तत्र, समन्ततः, एकदा)

(क) .................................. भगवान् बोधिसत्त्वः राजा बभूव।

(ख) .................................. अर्थिनाम् समूहः सन्तुष्टः अभवत्।

(ग) .................................. दानशालासु विचरन् राजा अचिन्तयत्।

(घ) सः नगरस्य .................................. दानशालाः अकारयत्।

(ङ) .................................. भवान् प्रीतः .................................. त्वत्तः एकस्य चक्षुषः दानम् इच्छामि।

**उत्तराणि**–(क) एकदा (ख) तत्र (ग) अथ कदाचित् (घ) समन्ततः (ङ) यदि, तदा।

11. **पाठात् उद्धृत्य एव कोष्ठकप्रदत्त-सर्वनाम-शब्दानाम् उचितरूपैः रिक्तस्थानानां पूर्तिः क्रियताम्–**

(क) .................................. बाल्यादेव वृद्धोपसेवी विनयशीलः चासीत्। (तत्)

(ख) जनकल्याणकर्मसु रतो .................................. पुत्रवत् प्रजाः पालयति स्म। (अदस्)

(ग) हे राजन्! .................................. दानवीरताम् आकर्ण्य भवत्समीपम् आगतोऽस्मि। (भवत्)

(घ) यदि .................................. प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि। (भवत्)

(ङ) आर्तानाम् परित्राणाय एव .................................. निश्चयः। (अस्मद्)

**उत्तराणि**–(क) सः (ख) असौ (ग) भवतः (घ) भवान् (ङ) मे।

12. **कोष्ठकप्रदत्तानां हलन्तशब्दानां समुचितविभक्तिप्रयोगैः रिक्तस्थानानि पूरयत–**

(क) .................................. दानशीलताम् आकर्ण्य जनाः तं देशम् आयान्ति स्म। (राजन्)

(ख) अथ कदाचित् दानशालासु .................................. स राजा अचिन्तयत्। (विचरत्)

(ग) ते दानवीराः नूनं .................................. यान् याचकाः शरीरस्य अंगानि याचन्ते। (सौभाग्यशालिन्)

(घ) भगवन्! .................................. अनुगृहीतं कर्तुम् इच्छामि। (आत्मन्)

(ङ) तत्र .................................. समूहः अभीष्टवस्तूनि प्राप्य सन्तुष्टः अभवत्। (अर्थिन्)

**उत्तराणि**–(क) राज्ञः (ख) विचरन् (ग) सौभाग्यशालिनः (घ) आत्मानम् (ङ) अर्थिनाम्।

## योग्यता-विस्तारः (न परीक्षाकृते)

**ग्रन्थ-परिचयः**

इयं कथा श्रीमदार्यशूरेण विरचितायाः जातकमालायाः सङ्गृहीता अस्ति। अस्मिन् ग्रन्थे भगवतः बुद्धस्य पूर्वजन्मनां कथाः सन्ति।

जातक (जात + कन्) अर्थात उत्पन्नः।

**बोधिसत्त्वः**–बोधि-ज्ञानम्। सत्त्वम्-मनः। ज्ञानाय यः प्रयतते सः बोधिसत्त्वः।

**हिंदी अनुवाद (Hindi Translation)**–यह कथा श्रीमान् आर्यशूर द्वारा रचित जातकमाला से संगृहीत है। इस ग्रन्थ में भगवान् बुद्ध के पूर्व जन्मों की कथाएँ।

**जातक**–जातक शब्द का अर्थ है उत्पन्न।

**बोधिसत्त्व**–बोधि शब्द का अर्थ है ज्ञान तथा सत्त्वम् शब्द का अर्थ है मन। अतः बोधिसत्त्व का अर्थ है–वह प्राणी जो ज्ञान प्राप्ति के लिए प्रयत्न करता है।

**दानमहिमा**–

(*i*) दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति।।

(*ii*) गौरवं प्राप्यते दानान्न तु वित्तस्य सञ्चयात्।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः।।

(*iii*) दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः।।

**हिंदी अनुवाद (Hindi Translation)**–(*i*) धन की तीन ही गतियाँ होती हैं–दान, भोग और नाश। जो व्यक्ति न धन का दान देता है, न भोग करता है उसके धन की तीसरी गति हो जाती है अर्थात् धन नष्ट हो जाता है।

(*ii*) व्यक्ति दान देने से ही गौरव प्राप्त करता है, धन को संग्रह करने से नहीं। जल को दान देने से ही बादलों की स्थिति ऊँची है व जल संग्रह करने से समुद्र की स्थिति नीचे है।

(*iii*) दान देना चाहिए, यह सोचकर जो कुछ दान अनुपकारी व्यक्ति को उचित देशकाल में और उचित पात्र को दिया जाता है उसी दान को सात्विक दान कहा जाता है।

## परीक्षोपयोगी अन्य महत्त्वपूर्ण प्रश्नोत्तराणि

**1. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत–** **5**

**(अ)** अथ कदाचित् दानसु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् ''मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अंगानि अपि याचन्ते। एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।''
राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत्–हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारा-मण्डलभूषितं जगदेतत् कथमिव पश्येयम् चक्षुर्हीनः।

**I. एकपदेन उत्तरत–** **½ × 2 = 1**

(*i*) राज्ञः निरासक्तिः केषु जाता? (*ii*) नेत्रहीनयाचकरूपे तत्र कः आगतः?

**II. पूर्णवाक्येन उत्तरत–** **2 × 1 = 2**

के सौभाग्यशालिनः भवन्ति?

**III. भाषिककार्यम्–** **½ × 4 = 2**

**(*i*) 'भवतः दानवीरताम् आकर्ण्य' इत्यत्र 'भवतः' पदम् कस्मै प्रयुक्तम्?**
(क) राज्ञे (ख) भिक्षुकाय (ग) विप्राय (घ) जनाय

**(*ii*) 'भजन्ते' इति क्रियापदस्य कर्तृपदं किम्?**
(क) जनाः (ख) प्रजाः (ग) याचकाः (घ) अर्थिनः

**(*iii*) 'जगत्' इति पदस्य किं विशेषणम्?**
(क) रवि-शशि-तारा-मण्डलभूषितम् (ख) एतत्
(ग) कथम् (घ) कथमिव

**(*iv*) अनुच्छेदे 'आसक्तिम्' पदस्य कः विपर्ययः प्रयुक्तः?**
(क) निरासक्तिम् (ख) मोहम् (ग) निर्मोहम् (घ) व्याकुलम्

**उत्तराणि–** I. (*i*) स्वगात्रेषु (*ii*) शक्रः

II. नूनं ते दानवीराः सौभाग्यशालिनः भवन्ति यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।

III. (*i*) (क) राज्ञे (*ii*) (घ) अर्थिनः (*iii*) (क) रवि-शशि-तारा-मण्डलभूषितम् (*iv*) (क) निरासक्तिम्।

**(आ)** नाहं स्वर्गं न मोक्षं वा कामये किन्तु आर्त्तानां परित्राणाय एव मे निश्चयः। अस्य याञ्चा वृथा मा अस्तु। इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्। सः अपि तत् नेत्रं यथास्थानम् अस्थापयत्। ततो महीपालः द्वितीयं नेत्रमपि शनैः निष्कास्य तस्मै ददौ। अथ विस्मितः शक्रः अचिन्तयत्–

अहो धृतिः! अहो सत्त्वम्! अहो सत्त्वहितैषिता!

नायम् चिरं परिक्लेशम् अनुभवितुम् अर्हति। अतः प्रयतिष्ये चक्षुषोऽस्य पुनः प्रत्यारोपणाय इति।

**I. एकपदेन उत्तरत–** ½ × 4 = 2

(*i*) नेत्रोत्पाटनविधिः केन उक्तः? (*ii*) नृपः केषां परित्राणाय निश्चयम् अकरोत्?

(*iii*) राजा नेत्रद्वयं कस्मै समर्पितवान्? (*iv*) कः स्वर्गं मोक्षं वा न इच्छति स्म?

**II. पूर्णवाक्येन उत्तरत–** 1 × 1 = 1

शक्रः कस्य चक्षुषः पुनः प्रत्यारोपणाय अचिन्तयत्?

**III. निर्देशानुसारम् कुरुत–** ½ × 4 = 2

(*i*) 'राजा' इति शब्दस्य किं पर्यायवाचिपदम् अत्र प्रयुक्तम्?

(क) सः (ख) शक्रः (ग) महीपालः (घ) विस्मितः

(*ii*) 'अस्य याञ्चा वृथा मा अस्तु' अत्र 'अस्य' इति पदं कस्मै प्रयुक्तम्?

(क) याचकाय (ख) शक्राय (ग) तृणाय (घ) राज्ञे

(*iii*) 'स्थानम् अनतिक्रम्य' इति पदस्य समस्तपदं किम् अस्ति?

(क) उपस्थानम् (ख) अनुस्थानम् (ग) निर्स्थानम् (घ) यथास्थानम्

(*iv*) 'प्राणिनां कल्याणस्य इच्छा' इति अस्मिन् अर्थे कः शब्दः गद्यांशे प्रयुक्तः?

(क) सत्त्वहितैषिता (ख) एषिता (ग) सत्त्वम् (घ) धृतिः

**उत्तराणि–** I. (*i*) वैद्येन (*ii*) आर्त्तानाम् (*iii*) याचकाय (*iv*) राजा

II. शक्र नृपस्य चक्षुषः पुनः प्रत्यारोपणाय अचिन्तयत्।

III. (*i*) (ग) महीपालः (*ii*) (क) याचकाय (*iii*) (घ) यथास्थानम् (*iv*) (क) सत्त्वहितैषिता

**2. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनर्लिखत–** ½ × 8 = 4

**(अ)** (*i*) राजा अभाषत, "किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि।

(*ii*) विप्रः उवाच, यदि भवान् प्रीतः तदा त्वत्तः एकचक्षुषः दानम् इच्छामि।

(*iii*) राजा उवाच, "भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम्? अनुगृहीतं कर्तुम् इच्छामि।

(*iv*) राज्ञः नेत्रदाननिश्चयं ज्ञात्वा अमात्याः अवदन्, "महाराज! अलम् एतावता दुस्साहसेन।"

(*v*) राजा अचिन्तयत्, "लोके चक्षुर्दानं दुष्करमेव।"

(*vi*) "आदिश्यताम्, किं करवाणि?"

(*vii*) अयं याचकः केनापि प्रेरितः स्यात्।

(*viii*) अथवा भवतु नाम! किं बहु चिन्तनेन।

**उत्तराणि–** (*i*) राजा उवाच, "भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम्? अनुगृहीतं कर्तुम् इच्छामि।

(*ii*) "आदिश्यताम्, किं करवाणि?"

(*iii*) विप्रः उवाच, यदि भवान् प्रीतः तदा त्वत्तः एकचक्षुषः दानम् इच्छामि।

(*iv*) राजा अचिन्तयत्, "लोके चक्षुर्दानं दुष्करमेव।"

(*v*) अयं याचकः केनापि प्रेरितः स्यात्।

(*vi*) अथवा भवतु नाम! किं बहु चिन्तनेन।

(*vii*) राजा अभाषत, "किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि।

(*viii*) राज्ञः नेत्रदाननिश्चयं ज्ञात्वा अमात्याः अवदन्, "महाराज! अलम् एतावता दुस्साहसेन।"

**(आ)** (*i*) एकदा शक्रः नेत्रहीनयाचकस्य रूपे राज्ञः समीपम् आगच्छत्।

(*ii*) विषण्णाः अमात्याः अवदन्–महाराज! अलम् एतावता दुस्साहसेन।

(*iii*) वैद्योक्तविधिना राजा एकं चक्षुः उत्पाट्य प्रीत्या याचकाय समर्पिवान्।

(*iv*) अथ भगवान् बोधिसत्त्वः शिवीनाम् राजा बभूव।

(*v*) याचकः उवाच–त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्।

(*vi*) जनकल्याणकर्मसु रतो राजा पुत्रवत् प्रजाः पालयति स्म।

(*vii*) भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि।

(*viii*) नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।

**उत्तराणि–** (*i*) अथ भगवान् बोधिसत्त्वः शिवीनाम् राजा बभूव।
(*ii*) जनकल्याणकर्मसु रतो राजा पुत्रवत् प्रजाः पालयति स्म।
(*iii*) एकदा शक्रः नेत्रहीनयाचकस्य रूपे राज्ञः समीपम् आगच्छत्।
(*iv*) याचकः उवाच–त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्।
(*v*) भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि।
(*vi*) नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।
(*vii*) विषण्णाः अमात्याः अवदन्–महाराज! अलम् एतावता दुस्साहसेन।
(*viii*) वैद्योक्तविधिना राजा एकं चक्षुः उत्पाट्य प्रीत्या याचकाय समर्पिवान्।

**3. प्रदत्ते भावार्थे रिक्तस्थानपूर्तिः क्रियताम्–** $1 \times 4 = 4$

**धनस्य निःसालघोः स सारो,**
**यद् दीयते लोकहितोन्मुखेन,**
**निधानतां याति हि दीयमानम्,**
**अदीयमानं निधनैकनिष्ठम्।**

**भावार्थ–** धनम् सारहीनम् अस्ति। तस्य अयम् एव (*i*) .................... यत् धनम् संसारस्य हिताय (*ii*) .................... तत् निधिरूपेण सुरक्षितः भवति, यत् (*iii*) .................... न दीयते तस्य तु एकपदे एव (*iv*) .................... सञ्जायते।

**उत्तराणि–**(*i*) सारः (*ii*) दीयते (*iii*) धनम् (*iv*) निधनम् (नाशः)

**4. प्रदत्ते भावार्थे रिक्तस्थानपूर्तिः क्रियताम्–** 4

**I. शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।**
**वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्॥** $\frac{1}{2} \times 4 = 2$

**अन्वयः–** राजर्षे:। अहं (*i*) .................... शक्रः त्वत् समीपम् (*ii*) .................... अस्मि। वरं (*iii*) .................... यत् इच्छसि (*iv*) .................... उच्यताम्।

**उत्तराणि–**(*i*) देवेन्द्रः (*ii*) उपागतः (*iii*) वृणीष्व (*iv*) तत्

**II. दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।**
**कार्पण्यानिश्चितमतेः काः स्यात् पापतरस्ततः॥** $\frac{1}{2} \times 4 = 2$

**अन्वयः–** दास्यामि इति प्रतिज्ञाय यः (*i*) .................... अन्यथा कुरुते, (*ii*) .................... अनिश्चित-मतेः (*iii*) .................... पापतरः (*iv*) .................... स्यात्।

**उत्तराणि–**(*i*) मनः (*ii*) कार्पण्य (*iii*) ततः (*iv*) कः

**5. अधोलिखितकथनेषु रेखाङ्कितपदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं कुरुत–** $1 \times 4 = 4$

(*i*) त्यागसमं सुखं नास्ति।
(*ii*) राज्ञः नेत्रदाननिश्चयं ज्ञात्वा अमात्याः विषण्णाः अभवन्।
(*iii*) राजा शिविः आमात्यान् उवाच।
(*iv*) अभीष्टं वस्तुजातं प्राप्य याचकाः तुष्टाः आसन्।

**उत्तराणि–**(*i*) किम् (*ii*) के (*iii*) कान् (*iv*) कीदृशम्

**6. अधोलिखित-श्लोकयोः उचितपदैः पूरयित्वा उत्तरपुस्तिकासु पुनः लिखत–** 4

**शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।**
**वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्॥** $\frac{1}{2} \times 4 = 2$

**अन्वयः–** राजर्षे:। अहं (*i*) .................... शक्रः त्वत् (*ii*) .................... उपागतः अस्मि। (*iii*) .................... वृणीष्व। यत् इच्छसि तत् (*iv*) ....................।

**उत्तराणि–**(*i*) देवेन्द्रः (*ii*) समीपम् (*iii*) वरं (*iv*) उच्यताम्

**7. दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।**
**कार्पण्यानिश्चितमतेः काः स्यात् पापतरस्ततः॥** $\frac{1}{2} \times 4 = 2$

**अन्वयः–** दास्यामि इति (*i*) .................... यः (*ii*) .................... अन्यथा कुरुते, (*iii*) .................... ततः पापतरः कः (*iv*) ....................।

**उत्तराणि–**(*i*) प्रतिज्ञाय (*ii*) मनः (*iii*) कार्पण्यानिश्चितमतेः (*iv*) स्यात्

**8. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः उत्तरपुस्तिकायां लिखत–** $\frac{1}{2} \times 8 = 4$

(*i*) अपि च नगरस्य समन्ततः राजा दानशालाः कारितवान्।
(*ii*) स्वपुण्यकर्मणां कारणात् स शिवीनां राजा अभवत्।
(*iii*) राज्ञः निर्णयं ज्ञात्वा सकलं ब्रह्माण्डं व्याकुलं जातम्।
(*iv*) भगवान् बोधिसत्त्वः पूर्वजन्मसु बहूनि पुण्यकर्माणि अकरोत्।
(*v*) अर्थिनां संख्या शनैः शनैः बिरला जाता।
(*vi*) राजा अर्थिनां विरलसंख्यां दृष्ट्वा अङ्गानि दातुं निश्चयमकरोत्।
(*vii*) राजा भूत्वा सः पुत्रवत् प्रजाः अपालयत्।
(*viii*) प्रजाजनाः दानशालासु अन्नवस्त्रादीनि प्राप्य सन्तुष्टाः अभवन्।

**उत्तराणि–** (*i*) भगवान् बोधिसत्त्वः पूर्वजन्मसु बहूनि पुण्यकर्माणि अकरोत्।
(*ii*) स्वपुण्यकर्मणाम् कारणात् स शिवीनां राजा अभवत्।

(*iii*) राजा भूत्वा सः पुत्रवत् प्रजाः अपालयत्।

(*iv*) अपि च नगरस्य समन्ततः राजा दानशालाः कारितवान्।

(*v*) प्रजाजनाः दानशालासु अन्न वस्त्रादीनि प्राप्य सन्तुष्टाः अभवन्।

(*vi*) अर्थिनाम् संख्या शनैः शनैः विरला जाता।

(*vii*) राजा अर्थिनाम् विरलसंख्याम् दृष्ट्वा अङ्गानि दातुम् निश्चयम् अकरोत्।

(*viii*) राज्ञः निर्णयम् ज्ञात्वा सकलम् ब्रह्माण्डम् व्याकुलम् जातम्।

**9. निम्नलिखितानां 'क' वर्गस्य पदानां 'ख' वर्गस्य पदेभ्यः विपर्ययचयनं कृत्वा लिखत–** **½ × 12 = 6**

| 'क' वर्गः | 'ख' वर्गः |
|---|---|
| (*i*) राजा | (1) चक्षुष्मान् |
| (*ii*) एकदा | (2) कृपणताम् |
| (*iii*) सन्तुष्टः | (3) रुष्टः |
| (*iv*) दानशीलताम् | (4) प्रजा |
| (*v*) भूषितम् | (5) बहुधा |
| (*vi*) चक्षुर्हीनः | (6) असन्तुष्टः |
| (*vii*) प्रीतः | (7) प्रसन्नाः |
| (*viii*) दानम् | (8) अभूषितम् |
| (*ix*) श्रुत्वा | (9) शीघ्रम् |
| (*x*) विषण्णाः | (10) सुखीनाम् |
| (*xi*) आर्त्तानाम् | (11) ग्रहणम् |
| (*xii*) चिरम् | (12) विस्मृत्य |

**उत्तराणि–** (*i*) (4) प्रजा (*ii*) (5) बहुधा (*iii*) (6) असन्तुष्टः (*iv*) (2) कृपणताम्
(*v*) (8) अभूषितम् (*vi*) (1) चक्षुष्मान् (*vii*) (3) रुष्टः (*viii*) (11) ग्रहणम्
(*ix*) (12) विस्मृत्य (*x*) (7) प्रसन्नाः (*xi*) (10) सुखीनाम् (*xii*) (9) शीघ्रम्।

## मूल्यपरक प्रश्नाः (VBQs)

**वाक्यानि पठित्वा वाक्याधारितान् प्रश्नाम् उत्तरत–**

**प्रश्नाः** (*i*) 'जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म।' अत्र नृपस्य स्वभावः कीदृशो वर्णितः?

(*ii*) 'नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।' इति वाक्ये नृपस्य कस्य गुणस्य वर्णनम् अस्ति?

(*iii*) 'लोके चक्षुर्दानं दुष्करमेव।' इति वाक्ये नृपः किं दानं कठिनं मन्यते?

(*iv*) 'अहो धृतिः! अहो सत्त्वम्! अहो सत्वहितैषिता!' अस्मिन् वाक्ये शक्रः नृपस्य कम् प्रशंसति?

(*v*) 'निधानतां याति हि दीयमानम्'। अत्र वाक्ये कीदृशं धनं महत्त्वपूर्णं कथितम्?

**उत्तराणि–** (*i*) स्नेहः (*ii*) दानशीलतायाः (*iii*) चक्षुर्दानम् (*iv*) सत्त्वम् (*v*) दीयमानम्